# Shri Rajarajeshvarishodashi

# શ્રીરાજરાજેશ્વરીષોડશી

## Document Information

Text title : rAjarAjeshvarIShoDashI

File name : rAjarAjeshvarIShoDashI.itx

Category : devii, sachchidAnanda-shivAbhinava-nRisiMhabhAratI, devI, dashamahAvidyA

Location : doc_devii

Author : Sachchidananda Shivabhinava Nrisimha Bharati Swamigal

Proofread by : PSA Easwaran psawaswaran at gmail.com

Latest update : November 9, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# શ્રીરાજરાજેશ્વરીષોડશી

નૌમિ હ્રીઞ્જપમાત્રતુષ્ટહૃદયાં શ્રીચક્રરાજાલયાં
ભાગ્યાયત્તનિજાઙ્ઘ્રિપઙ્કજનતિસ્તોત્રાદિસંસેવનામ્ ।
સ્કન્દેભાસ્યવિભાસિપાર્શ્વયુગલાં લાવણ્યપાથોનિધિં
ભક્તત્રાણપરાયણાં ભગવતીં શ્રીરાજરાજેશ્વરીમ્ ॥ ૧॥

નૌમિ હ્રીમત આદધાતિ સુગિરા વાગીશ્વરાદીન્સુરાઁ-
લ્લક્ષ્મીન્દ્રપ્રમુખાંશ્ચ સત્વરમહો યત્પાદનમ્રો જનઃ ।
કામાદીંશ્ચ વશીકરોતિ તરસાઽઽયાસં વિના તાં મુદા
ભક્તત્રાણપરાયણાં ભગવતીં શ્રીરાજરાજેશ્વરીમ્ ॥ ૨॥

નૌમિ શ્રીસુતજીવનપ્રદકટાક્ષાંશાં શશાઙ્કં રવિં
કુર્વાણાં નિજકર્ણભૂષણપદાદાનેન તેજસ્વિનૌ ।
ચામ્પેયં નિજનાસિકાસદૃશતાદાનાત્કૃતાર્થં તથા
ભક્તત્રાણપરાયણાં ભગવતીં શ્રીરાજરાજેશ્વરીમ્ ॥ ૩॥

નૌમિ શ્રીવિધિભામિનીકરલસત્સચ્ચામરાભ્યાં મુદા
સવ્યે દક્ષિણકે ચ વીજનવતીમૈન્દ્યાત્તસત્પાદુકામ્ ।
વેદૈરાત્તવપુર્ભિરાદરભરાત્સંસ્તૂયમાનાં સદા
ભક્તત્રાણપરાયણાં ભગવતીં શ્રીરાજરાજેશ્વરીમ્ ॥ ૪॥

નૌમિ શ્રીમતિધૈર્યવીર્યજનનીં પાદામ્બુજે જાતુચિ-
ન્નમ્રાણામપિ શાન્તિદાન્તિસુગુણાન્વિશ્રાણયન્તીં જવાત્ ।
શ્રીકામેશમનોઽમ્બુજસ્ય દિવસેશાનાર્ભકાણાં તતિં
ભક્તત્રાણપરાયણાં ભગવતીં શ્રીરાજરાજેશ્વરીમ્ ॥ ૫॥

નૌમિ શ્રીપતિપદ્મયોનિગિરિજાનાથૈઃ સમારાધિતાં
રમ્ભાસ્તમ્ભસમાનસક્થિયુગલાં કુમ્ભાભિરામસ્તનીમ્ ।
ભામિન્યાદિવિષોપમેયવિષયેષ્વત્યન્તવૈરાગ્યદાં
ભક્તત્રાણપરાયણાં ભગવતીં શ્રીરાજરાજેશ્વરીમ્ ॥ ૬॥

નૌમિ વ્યાહૃતિનિર્જિતામરધુનીગર્વાં ભવન્ત્યઞ્જસા
મૂકા અપ્યવશાદ્યદઙ્ઘ્રિયુગલીસદ્દર્શનાજ્જાતુચિત્ ।
હાર્દધ્વાન્તનિવારણં વિદધતીં કાન્ત્યા નખાનાં હિ તાં
ભક્તત્રાણપરાયણાં ભગવતીં શ્રીરાજરાજેશ્વરીમ્ ॥ ૭॥

નૌમિ બ્રહ્મવિબોધિનીં નમુચિજિન્મુખ્યામરાણાં તતે-
ર્ભણ્ડાદ્યાશરખણ્ડનૈકનિપુણાં કલ્યાણશૈલાલયામ્ ।
ફુલ્લેન્દીવરગર્વહારિનયનાં મલ્લીસુમાલઙ્કૃતાં
ભક્તત્રાણપરાયણાં ભગવતીં શ્રીરાજરાજેશ્વરીમ્ ॥ ૮॥

નૌમિ પ્રીતિમતાં યદઙ્ઘ્રિયુગલાર્ચાયાં ન બન્ધો ભવેત્
સ્યાચ્ચેદ્વિન્ધ્યનગઃ પ્લવેચ્ચિરમહો નાથે નદીનામિતિ ।
મૂકઃ પ્રાહ મહાકવિર્હિ કરુણાપાત્રં ભવાન્યાઃ સ્તુતિં
ભક્તત્રાણપરાયણાં ભગવતીં શ્રીરાજરાજેશ્વરીમ્ ॥ ૯॥

નૌમિ પ્રાપ્તિકૃતે યદીયપદયોર્વિપ્રાઃ સમસ્તેષણા-
સ્ત્યક્ત્વા સદ્ગુરુમભ્યુપેત્ય નિગમાન્તાર્થં તદાસ્યામ્બુજાત્ ।
શ્રુત્વા તં પ્રવિચિન્ત્ય યુક્તિભિરતો ધ્યાયન્તિ તાં સાદરં
ભક્તત્રાણપરાયણાં ભગવતીં શ્રીરાજરાજેશ્વરીમ્ ॥ ૧૦॥

નૌમિ પ્રાણનિરોધસજ્જનસમાસઙ્ગાત્મવિદ્યામુખૈ-
રાચાર્યાનનપઙ્કજપ્રગલિતૈશ્ચેતો વિજિત્યાશુ યામ્ ।
આધારાદિસરોરુહેષુ સુખતો ધ્યાયન્તિ તાં સર્વદા
ભક્તત્રાણપરાયણાં ભગવતીં શ્રીરાજરાજેશ્વરીમ્ ॥ ૧૧॥

નૌમિ ન્યાયમુખેષુ શાસ્ત્રનિવહેષ્વત્યન્તપાણ્ડિત્યદાં
વેદાન્તેષ્વપિ નિશ્ચલામલધિયં સંસારબન્ધાપહામ્ ।
દાસ્યન્તીં દયયા પ્રણમ્રવિતતેઃ કામારિવામાઙ્ગગાં
ભક્તત્રાણપરાયણાં ભગવતીં શ્રીરાજરાજેશ્વરીમ્ ॥ ૧૨॥

નૌમિ ત્વાં શુચિસૂર્યચન્દ્રનયનાં બ્રહ્મામ્બુજાક્ષાગજે-
ડ્રૂપાણિ પ્રતિગૃહ્ય સર્વજગતાં રક્ષાં મુદા સર્વદા ।
કુર્વન્તીં ગિરિસાર્વભૌમતનયાં ક્ષિપ્રં પ્રણમ્રેષ્ટદાં
ભક્તત્રાણપરાયણાં ભગવતીં શ્રીરાજરાજેશ્વરીમ્ ॥ ૧૩॥

નૌમિ ત્વાં શરદિન્દુસોદરમુખીં દેહપ્રભાનિર્જિત-

પ્રોદ્યદ્ભાસરનાથસન્તતિમઘામ્ભોરાશિકુમ્ભોદ્ભવમ્ ।
પઞ્ચપ્રેતમયે સદા સ્થિતિમતીં દિવ્યે મૃગેન્દ્રાસને
ભક્તત્રાણપરાયણાં ભગવતીં શ્રીરાજરાજેશ્વરીમ્ ॥ ૧૪॥

નૌમિ ત્વામનપેક્ષકારણકૃપારૂપેતિ કીર્તિં ગતાં
નૌકાં સંસૃતિનીરધેસ્તુ સુદૃઢાં પ્રજ્ઞાનમાત્રાત્મિકામ્ ।
કાલામ્ભોદસમાનકેશનિચયાં કાલાહિતપ્રેયસીં
ભક્તત્રાણપરાયણાં ભગવતીં શ્રીરાજરાજેશ્વરીમ્ ॥ ૧૫॥

નૌમિ ત્વાં ગણપઃ શિવો હરિરુમેત્યાદ્યૈર્વચોભિર્જના-
સ્તત્તન્મૂર્તિરતા વદન્તિ પરમપ્રેમ્ણા જગત્યાં તુ યામ્ ।
તાં સર્વાશયસંસ્થિતાં સકલદાં કારુણ્યવારાન્નિધિં
ભક્તત્રાણપરાયણાં ભગવતીં શ્રીરાજરાજેશ્વરીમ્ ॥ ૧૬॥

ઇતિ શૃઙ્ગેરિ શ્રીજગદ્ગુરુ શ્રીસચ્ચિદાનન્દશિવાભિનવનૃસિંહ-
ભારતીસ્વામિભિઃ વિરચિતા શ્રીરાજરાજેશ્વરીષોડશી સમ્પૂર્ણા ।

Proofread by PSA Easwaran

---

*Shri Rajarajeshvarishodashi*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*